


## अथ बुध स्तोत्रं

अस्य श्री बुध स्तोत्र महामंत्रस्य वसिष्ठ ऋषिः। त्रिष्टुप् छंदः। श्री बुधो देवता। बुध प्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) बुधाय अंगुष्ठाभ्यां नमः। सौम्याय तर्जनीभ्यां नमः। सिंहारूढाय मध्यमाभ्यां नमः। चतुर्बाहवे अनामिकाभ्यां नमः। गदाधराय कनिष्ठिकाभ्यां नमः। सोमपुत्राय करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) बुधाय हृदयाय नमः। सौम्याय शिरसे स्वाहा। सिंहारूढाय शिखायै वषट्। चतुर्बाहवे कवचाय हुं। गदाधराय नेत्रत्रयाय वौषट्। सोमपुत्राय अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्बंधः॥ (ध्यानं) बुधश्चतुर्भिः वरदाभयासि गदां महंतं वरदं प्रशांतं। पीतद्रुवं चंद्रसुतं सुराराध्यं सिंहेनिषण्णं बुधमाश्रयामि पीतांबरं पीतवस्त्रानुतश्च किरीटकश्चर्मधुः चतुर्भुजः॥ पीतश्चत्रध्वज पताकिनीतः प्रसन्नात्मा रोहिणीगर्भसंभवः। ईशान्यादि देशस्त्येथा बाणासन उद्गर्भमुखं। नाथो मगधदेशस्य मंत्रो मंत्रार्थतत्वरः॥ सुखासनः कर्णिकारो जेत्रोरात्रेय गोत्रवान्। भरद्वाज ऋषिः प्रख्यैः ज्योतिर्मंडल मंडितः॥ अधिप्रत्ययदेवाख्यां मन्यतो ग्रहमंडले। प्रविष्ट सूक्ष्मरूपेण समस्त वरदस्सुखी॥ सदाप्रदक्षिणं मेरोः कुर्वणा कामकूपवान्। असि दंडं च भिभ्राणं संप्राप्त फलप्रदः॥ कन्यायाया मिथुनस्यापि राशेरधिपतिर्द्वयोः। मुद्गधान्यप्रदोनित्यं मर्त्यार्मत्य सुरार्चितः॥ यस्तु सौम्येन मनसा स्वमात्मानं प्रपूजयेत्। तस्य वश्योभवेन्नित्यं सौम्यनामधरो बुधः॥ बुधस्तोत्रमिदं गुह्यं वसिष्ठेनोदितं पुरा। दिलीपाय लिखेष्वाद्धि याचमानाय भूभृते॥ यः पठेदेकवारं वा सर्वाभीष्टमवाप्नुयात्। स्तोत्रराजमिदं पुण्यं गुह्याद्गुह्यतमं महत्॥ एकवारं द्विवारं वा त्रिवारं यः पठेन्नरः। तस्यापस्मारकुष्ठादि व्याधि बाधोनविद्यते॥ सर्वग्रहकृतं पीडं पठतेस्मिन्नविद्यते। कृतिमौषध दुर्मंत्रं कृत्रिमादि निशाचरैः॥ युद्धद्भयं भवेत्तत्र पठतेस्मिन्नविद्यते। प्रतिमायंच स्वर्णेन लिखितं भूजविष्टकं॥ मुद्गधान्योपरिन्यस्त पीतवस्त्रान्विते घटे। विनस्त विधिना सम्यक्मासमेकं निरंतरं॥ ये पूजयंति ते यांति दीर्घामायुः प्रजाधनं। आरोग्यभस्म गुल्मादि सर्वव्याधि विनाशनं॥ यं कामयते सम्यक्तं अवाप्नोत्य नसंशयः॥ इति श्री स्कांद पुराणे बुध स्तोत्रं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com